# sarasvatItantram

# સરસ્વતીતન્ત્રમ્

## Document Information

Text title : Sarasvati Tantram

File name : sarasvatItantram.itx

Category : devii, sarasvatI, devI

Location : doc_devii

Transliterated by : DPD

Proofread by : DPD, Preeti Bhandare

Latest update : April 13, 2027

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 13, 2024

*sanskritdocuments.org*

# સરસ્વતીતન્ત્રમ્

વિષયાનુક્રમણિકા

પ્રથમઃ પટલઃ

દ્વિતીયઃ પટલ

તૃતીય-પટલઃ

ચતુર્થઃ પટલઃ

પઞ્ચમઃ પટલઃ

ષષ્ઠઃ પટલઃ

---

## પ્રથમઃ પટલઃ

શ્રીપાર્વત્યુવાચ -

મન્ત્રાર્થં મન્ત્રચૈતન્યં યોનિમુદ્રાં ન વેત્તિયઃ ।
શતકોટિજપેનાપિ તસ્ય વિદ્યા ન સિધ્યતિ ॥ ૧॥

મહાદેવ મહાદેવ ઇતિ યત્ પૂર્વસૂચિતમ્ ।
એતત્તત્વં મહાદેવ કૃપયા વદ્ શઙ્કર ॥ ૨॥

પાર્વતી કહતી હૈં -મહાદેવ ! જો મન્ત્રાર્થઃ, મન્ત્રચૈતન્ય
તથા યોનિમુદ્રા નહીં જાનતે, ઉન્હેં શતકોટિ સંખ્યાત્મક જપ કરને
સે ભી વિદ્યા સિદ્ધ નહીં હોતી । આપને પહલે ભી યહી કહા હૈં ।
હે શઙ્કર ! ઇસ તત્ત્વકો (પુનઃ) કૃપાપૂર્વક કહિયે ॥ ૧-૨॥

ઈશ્વર ઉવાચ -
મન્ત્રાર્થં પરમેશાનિ સાવધાનાવધારય ।
તથાચ મન્ત્રચૈતન્યં નિર્વાણમુત્તમોત્તમમ્ ॥ ૩॥

પ્રસઙ્ગાત્પરમેશાનિ નિગદામિ તવાજ્ઞયા ।
મૂલાધારે મૂલવિદ્યાં ભાવયેદિષ્ટદેવતામ્ ॥ ૪॥

ઈશ્વર કહતે હૈં -હે પરમેશ્વરી ! તુમ સાવધાન હોકર
મન્ત્રાર્થ તથા મન્ત્ર ચૈતન્ય કો સુનો । હે પરમેશ્વરી ! તુમ્હારી
આજ્ઞા કે અનુસાર પ્રસંગવશાત્ ઉત્કૃષ્ટતમ સ્થિતિ નિર્વાણ કે સમ્બન્ધ
મે ભી કહૂંગા । મૂલાધાર પદ્મ મેં અવસ્થિત મૂલવિદ્યા કા (કુણ્ડલિની
કા) ઇષ્ટ રૂપ મેં ચિન્તન કરો ॥ ૩-૪॥

શુદ્ધસ્ફટિકસઙ્કાશાં ભાવયેત્ પરમેશ્વરીમ્ ।
ભાવયેદક્ષરશ્રેણી મિષ્ટવિદ્યાં સનાતનીમ્ ॥ ૫॥

પરમેશ્વરી કી ભાવના શુદ્ધ નિર્મલ સ્ફટિક કે સમાન કરના ચાહિએ ।
ઉસ મૂલાધાર કમલ મે સ્થિત વ, શ, ષ, સ અક્ષરો કો સનાતની
ઇષ્ટ વિદ્યા રૂપ સે ભાવના કરો ॥ ૫॥

મુહૂર્તાર્દ્ધં વિભાવ્યૈતાં પશ્ચાદ્ધ્યાનપરો ભવેત્ ।
ધ્યાને કૃત્વા મહેશાનિ મુહૂર્તાર્દ્ધં તતઃ પરમ્ ॥ ૬॥

તતો જીવો મહેશાનિ મનસા કમલેક્ષણે ।
સ્વાધિષ્ઠાનં તતો ગત્વા ભાવયેદિષ્ટદેતતામ્ ॥ ૭॥

બન્ધૂકારુણસઙ્કાશાં જવાસિન્દૂરસન્નિભામ્ । var જપા
વિભાવ્ય અક્ષરશ્રેણીં પદ્મમધ્યગતાં પરામ્ ॥ ૮॥

તતો જીવઃ પ્રસન્નાત્મા પક્ષિણા સહ સુન્દરિ ।
મણિપૂરં તતો ગત્વા ભાવયેદિષ્ટદેવતામ્ ॥ ૯॥

જીવ મુહૂર્તમાત્રં કાલ પર્યન્ત ઇનકા ચિન્તન કરકે ધ્યાનરત હો
જાયે । હે મહેશ્વરી ! હે કમલનેત્રોં વાલી ! તદનન્તર મન દ્વારા
સ્વાધિષ્ઠાન ચક્ર મે જાકર ઇષ્ટદેવ કા ચિન્તન કરે । વહાઁબન્ધૂકારુણ,
જવાપુષ્પ તથા સિન્દૂર કે સમાન ગાઢે રક્તવર્ણ યુક્ત var જપા
અક્ષર બ, ભ, મ, ય, ર, લ કી ઇષ્ટદેવતા રૂપ સે ભાવના કરકે
પ્રસન્ન-ચિત્ત હો જાયે । હે સુન્દરી ! વહ પ્રસન્નચિત્ત જીવ મન
દ્વારા મણિપૂર ચક્ર મે જાકર ઇષ્ટ કા ચિન્તન કરે ॥ ૬-૯॥

વિભાવ્ય અક્ષરશ્રેણીં પદ્મમધ્યગતાં પરામ્ ।
શુદ્ધહાટકસઙ્કાશાં શિવપદ્મોપરિ સ્થિતામ્ ॥ ૧૦॥

તતો જીવો મહેશાનિ પક્ષિણા સહ પાર્વતિ ।

હૃત્પદ્મં પ્રયયૌ શીઘ્રં નીરજાયતલોચને ॥ ૧૧॥

ઇષ્ટવિદ્યાં મહેશાનિ ભાવયેત્ કમલોપરિ ।
વિભાવ્ય અક્ષરશ્રેણીં મહામરકતપ્રભામ્ ॥ ૧૨॥

તતો જીવો વારારોહે વિશુદ્ધં પ્રયયૌ પ્રિયે ।
તત્પદ્મગહનં ગત્વા પક્ષિણા સહ પાર્વતિ ॥ ૧૩॥

ઇષ્ટવિદ્યાં મહેશાનિ આકાશોપરિ ચિન્તયેત્ ।
પક્ષિણા સહ દેવેશિ ખઞ્જનાક્ષિ શુચિસ્મિતે ॥ ૧૪॥

ઇષ્ટવિદ્યા મહેશાનિ સાક્ષાદબ્રહ્મસ્વરૂપિણીમ્ ।
વિભાષ્ય અક્ષરશ્રેણીં હરિદ્વર્ણાં વરાનને ॥ ૧૫॥

આજ્ઞાચક્રે મહેશાનિ ષટ્ચક્રે ધ્યાનમાચરેત્ ।
ષટ્ચક્રે પરમેશાનિ ધ્યાનં કૃત્વા શુચિસ્મિતે ॥ ૧૬॥

ધ્યાનેન પરમેશાનિ યદ્રૂપં સમુપસ્થિતમ્ ।
તદેવ પરમેશાનિ મન્ત્રાર્થં વિદ્ધિ પાર્વતિ ॥ ૧૭॥

મણિપૂર ચક્રસ્થ દશદલપદ્મ મેં વિશુદ્ધ અક્ષર શ્રેણી ડ ઢ ણ
ત થ દ ધ ન પ ફ કા શિરઃ પદ્મ કે ઊપર સ્થિત પરમદેવતારૂપ
સે ચિન્તન કરે । હે મહેશ્વરી ! હે કમલલોચની ! તદનન્તર જીવ
શીઘ્રતા સે (મન દ્વારા) હૃદયકમલ મે પહુઁચે । (૩)

હે મહેશાની ! ઇષ્ટવિદ્યા કા ચિન્તન પદ્મ કે ઊપર સ્થિત રૂપ સે
કરે । વહાઁ અક્ષર શ્રેણી ક ખ ગ ઘ ઙ ચ છ જ ઝ ઞ ટ ઠ
(દ્વાદશદલપદ્મ) કા ચિન્તન મહામરકત મણિ કે વર્ણ સે કરે ।

હે પાર્વતી ! હે સુન્દરી ! તત્પશ્ચાત્ જીવ વિશુદ્ધ કમલ મેં જાકર
વહાઁ હરિત વર્ણ કે અક્ષર શ્રેણી (૧૬ સ્વરવર્ણ કા) કા ચિન્તન
સાક્ષાત્ બ્રહ્મરૂપિણી ઇષ્ટવિદ્યા-રૂપેણ કરે । ઇસકે પશ્ચાત્ આજ્ઞાચક્ર
મેં (મન દ્વારા) જાકર ઉસ ચક્ર મે સ્થિત અક્ષર હ, ક્ષ કે સાથ
અભેદ ભાવના સે ઇષ્ટ દેવતા કી ભાવના કરે ! હે શુચિસ્મિતે ! યહ
ષટ્ચક્ર ધ્યાન કા ક્રમ હૈં । ઇસ ધ્યાન કે દ્વારા જો રૂપ પ્રતિભાત
હોતા હૈ, વહી મન્ત્રાર્થ હૈ ॥ ૧૦-૧૭॥

॥ ઇતિ સરસ્વતીતન્ત્રે પ્રથમઃ પટલઃ ॥

॥ સરસ્વતીતન્ત્ર કા પ્રથમ પટલ સમાપ્ત ॥

દ્વિતીયઃ પટલઃ

ઈશ્વર ઉવાચ -

તથાચ મન્ત્ર ચૈતન્યં લિઙ્ગાગમે પ્રકાશિતમ્ ।
યોનિમુદ્રા મયાખ્યાતા પુરા તે રુદ્રયામલે ॥

ઇદાનીં શ્રૂયતાં દેવિ નિર્વાણં યેન વિન્દતિ ।
પ્રપઞ્ચોઽપિ તતો ભૂત્વા જીવસ્તુ પક્ષિણા સહ ॥

પ્રયયૌ પરમં રમ્યં નિર્વાણં પરમં પદમ્ ।
સહસ્રારં શિવં પૂજ્યં તન્મધ્યે શાશ્વતી પુરી ॥

તાસ્તુ દેવિ પુરીં વિદ્ધિ સર્વશક્તિમયીં પ્રિયે ।
પક્ષિણા સહ દેવેશિ જીવઃ શીઘ્રં પ્રયાતિ હિ ॥ ૪॥

ઈશ્વર કહતે હૈં -હે દેવી ! મન્ત્ર ચૈતન્ય કિસે કહતે હૈ,
યહ લિંગાગમ મે કહા ગયા હૈં । પહલે રુદ્રયામલ તન્ત્ર મેં મૈને
યોનિમુદ્રાસ્વરૂપ કા ઉપદેશ દિયા હૈં । અબ જિસકે દ્વારા નિર્વાણરૂપી
પરમ સુખ મિલતા હૈ, વહ સુનો । જીવ પ્રપંચરૂપ હો અર્થાત્ સમસ્ત
પ્રપંચ કો, વિશ્વ કો, અપને મે અભેદરૂપ સે દેખકર પક્ષી કે સાથ
(પક્ષી અર્થાત્ ઉર્ધ્વગતિ રૂપી સ્પન્દ કે સાથ) નિર્વાણ રૂપ પરમ પદ
મે ગમન કરતા હૈ । સહસ્રદલ કમલ મંગલમય હૈ ઔર પૂજ્ય
સ્થાન હૈ । વહ નિત્ય પુરી ભી હૈ । હે દેવી ! હે પ્રિયે ! વહ પુરી
સર્વશક્તિમયી હૈ ।

યહાઁ યહ ભાવના કરો કિ વિશ્વ પ્રપંચ કી નિર્માણોપયોગી સમસ્ત
સામગ્રી વહાઁ હૈં । કુણ્ડલિની કે સાથ જીવ કો ઉસ પુરી મે લે જાના
ચાહિયે ॥ ૧-૪॥

વિભાવ્ય અક્ષરશ્રેણીમમૃતાર્ણવશાયિનીમ્ ।
સદાશિવપુરં રમ્યં કલ્પવૃક્ષતલસ્થિતમ્ ॥ ૫॥

નાનારત્નસમાકીર્ણં તન્મૂલં કમલાનને ।
વૃક્ષઞ્ચ પરમેશાનિ સતતં ત્રિગુણાત્મકમ્ ॥ ૬॥

પઞ્ચભૂતાત્મકં વૃક્ષં ચતુઃશાખાસમન્વિતમ્ ।
ચતુઃશાખાં ચતુર્વેદં ચતુર્વિંશતિતત્વકમ્ ॥ ૭॥

અબ સમસ્ત અક્ષર સમૂહ અમૃત સમુદ્ર મે શયન કર રહે
હૈં, યહ ચિન્તન કરકે વક્ષ્યમાણ વિષય કા ચિન્તન કરે । હે
કમલાનને ! કલ્પવૃક્ષ કે નીચે મનોરમ સદાશિવપુરી હૈ ।
ઉસકા મૂલ નાનાપ્રકાર કે રત્નો કે દ્વારા વ્યાપ્ત હૈ । હે પરમેશ્વરી !
વહ વૃક્ષ સર્વદા ત્રિગુણાત્મક હૈ, સત્વ-રજન્તમોમય હૈ ।
વહ પંચભૂતમય વૃક્ષ ઋક્-યજુઃ સામ એવં અથર્વ રૂપી ચાર
શાખાઓં સે શોભિત હૈ । યહી ૨૪ તત્ત્વાત્મક ભી હૈ ॥ ૫-૭॥

ચતુર્વર્ણયુતં પુષ્પં શુક્લં રક્તં શચિસ્મિતે ।
પીતં કૃષ્ણં મહેશાનિ પુષ્પદ્વયં પરં શ‌ૃણુ ॥ ૮॥

હરિતઞ્ચ મહેશાનિ વિચિત્રં સર્વમોહનમ્ ।
ષટ્પૂષ્પાણિ મહેશાનિ ષડ્દર્શનમિદં સ્મૃતમ્ ॥ ૯॥

અન્યાનિ ક્ષુદ્રશાસ્ત્રાણિ શાખાનિ મીનલોચને ।
તાનિ સર્વાણિ પત્રાણિ સર્વશાસ્ત્રાણિ ચેશ્વરિ ॥ ૧૦॥

હે શુચિસ્મિતે ! તપ્ત વૃક્ષ કા પુષ્પ ચાર વર્ણ યુક્ત હૈ । યથા
શુક્લ, રક્ત, પીત એવં કૃષ્ણ । હે મહેશ્વરી ! ઔર ભી દો પ્રકાર
કે પુષ્પ હૈં । વે હૈં હરિતવર્ણ તથા નાનાવિચિત્ર વર્ણ વાલે ।
વે સભી મન કો મોહિત કરને વાલે હૈં । યે ૬ પ્રકાર કે પુષ્પ હી
ષડ્દર્શનશાસ્ત્ર હૈં ।

હે મીનનેત્રે અન્ય છોટે-છોટે શાસ્ત્ર વૃક્ષ કી છોટી શાખાયે હૈ ॥ ૮-૧૦॥

ઇતિહાસપુરાણાનિ સર્વાણિ વૃક્ષસંસ્થિતમ્ ।
ત્વગસ્થિમેદમઞ્જાનિ વૃક્ષશાખાનિ યાનિ ચ ॥ ૧૧॥

તાનિ સર્વાણિ દેવેશિ ઇન્દ્રિયાણિ પ્રકીર્ત્તિતમ્ ।
સર્વશક્તિમયં દેવિ વિદ્ધિ ત્વં મીનલોચને ॥ ૧૨॥

ઇતિહાસપુરાણાદિ ઇસ વૃક્ષ કે ત્વક્, અસ્થિ તથા મેદ એવં મજ્જારૂપ
હૈં । હે દેવેશી ! વૃક્ષ કી શાખા આદિ કો ઇન્દ્રિય ભી કહા ગયા હૈ ।
હે મીનનેત્રોવાલી ! તુમ ઉક્ત વૃક્ષ કો સર્વશક્તિમય જાનો ॥ ૯-૧૨॥

એવદ્ભુતં મહાવૃક્ષભ્રમરૈઃ પરિશોભિતમ્ ।

કોકિલૈઃ પરમેશાનિ શોભિતા વૃક્ષપક્ષિભિઃ ॥ ૧૩॥

હે પરમેશ્વરી ! યહ મહાવૃક્ષ અમરદેવો દ્વારા પરિશોભિત હૈ ।
કોકિલ પ્રભૃતિ વૃક્ષ કે પક્ષિયોં દ્વારા ભી યહ શોભિત હૈ ॥ ૧૩॥

સુશોભિતં દેવગણૈર્ધનરત્નાદિકાંક્ષિભિઃ ।
એવં કલ્પદ્રુમં ધ્યાત્વા તદધો રત્નવેદિકામ્ ॥ ૧૪॥

તત્રોપરિ મહેશાનિ પર્યઙ્કં ભાવયેત્ પ્રિયે ।
સૂક્ષ્મં હિ પરમં દિવ્યં પર્યઙ્કં સર્વમોહનમ્ ॥ ૧૫॥

ધનરત્નાદિ કી અભિલાષા રખને વાલે સાધક કો દેવતાઓં સે શોભિત
કલ્પતરુ કા ચિન્તન કરકે ઉસકી છાયા મે નીચે રક્ખી રત્નમયી વેદિકા
કી ભાવના કરની ચાહિયે । હે પ્રિયે ! હે મહેશાની ! ઉસ વેદિકા પર
સૂક્ષ્મ પરમ દિવ્ય, સર્વમોહન પલંગ કી ભાવના કરે ॥ ૧૪-૧૫॥

ચન્દ્રકોટિસમં દેવિ સૂર્યકોટિસમપ્રભમ્ ।
શીતાંશુરશ્મિસંયુક્તં નાનાગન્ધસુમોદિતમ્ ॥ ૧૬॥

નાનાપુષ્પસમૂહેન રચિતં હેમમાલયા ।
તતઃ પરં મહેશાનિ યોગિનીકોટિચેષ્ઠિતમ્ ॥ ૧૭॥

યોગિનીમુખગન્ધેન ભ્રમરાઃ પ્રપતન્તિ ચ ।
યોગિની મોહિની સાક્ષાત્ વેષ્ઠિતં કમલેક્ષણે ॥ ૧૮॥

હે દેવી ! વહ પલંગ કરોડોં ચન્દ્રમા કે સમાન તથા કરોડોં સૂર્ય કે
સમાન પ્રભાયુક્ત હૈં । વહ ચન્દ્ર કિરણો સે યુક્ત તથા વિભિન્ન
સુગન્ધોં સે આમોદિત હૈં । યહ પલંગ નાનાપુષ્પ સમૂહ સે સજાઈ ગઈ
હૈં તથા સ્વર્ણમાલાઓં સે સુશોભિત હૈં । હે મહેશ્વરી ! યહ પલંગ
કરોડોં યોગિનિયોં સે ઘિરી હુઇ હૈં । ઉન યોગિનિયો કે મુખ કી સુગન્ધ સે
આકર્ષિત હોકર ભ્રમરગણ વહાઁ આ રહે હૈં । હે કમલવદને ! જિન
યોગિની કે લિયે યહ પલંગ ઘિરી હૈ, વે યોગિની સાક્ષાત્ મોહિનીરૂપ હૈં
॥ ૧૭-૧૮॥

અત્યન્તકોમલં સ્વચ્છં શુદ્ધફેનસમં પ્રિયે ।
પર્યઙ્કઃ પરમેશાનિ સદાશિવઃ સ્વયં પુનઃ ॥ ૧૯॥

હે પ્રિયે ! વહ અત્યન્ત કોમલ તથા શુદ્ધ ફેન કે સમાન સ્વચ્છ
પલગ હૈ । હે પરમેશ્વરી સ્વયં સદાશિવ હી પલંગ સ્વરૂપ હૈં

॥ ૧૯ ॥

જીવઃ પુષ્પં વદેત્ દેવિ ભાવયેત્તવ પાર્વતિ ।
સદાશિવં મહેશાનિ તન્મહાકુણ્ડલીયુતમ્ ॥ ૨૦ ॥

હે દેવી ! જીવ પુષ્પ સ્વરૂપ હૈ, વહ તુમ્હારી ભાવના કરે । હે
મહેશ્વરી ! મહાકુણ્ડલીયુક્ત સદાશિવ હૈં ॥ ૨૦ ॥

કામિનીકોટિસંયુક્તં ચામરૈર્હસ્તસંસ્થિતમમ્ ।
એવં વિભાવ્ય મનસિ સદા જીવઃ શુચિસ્મિતે ॥ ૨૧ ॥

હે શુચિસ્મિતે ! (શુદ્ધ હાસ્ય કરનેવાલી) વે સદાશિવ કરોડોં
કામિનીગણ સે યુક્ત હૈં । કામિની હાથ મે ચામર લિયે હૈં । જીવ
કો સદા ઇસી પ્રકાર સે ચિન્તન કરના ચાહિયે ॥ ૨૧ ॥

યસ્ય યસ્ય મહેશાનિ યદિષ્ટં કમલાનને ।
તસ્ય જ્ઞાનસમાયુક્તો મનસા પરમેશ્વરિ ॥ ૨૨ ॥

જોવોધ્યાનપરો ભૂત્વા જપેદસ્ય શતં પ્રિયે ।
મન્ત્રાક્ષરં મહેશાનિ માતૃકાપુટિતં ક્રમાત્ ॥ ૨૩ ॥

હે મહેશાની, પરમેશ્વરી ! કમલવદને ! જિનકા જિનકા જો ભી ઇષ્ટ
હૈ, વે મન હી મન ઉસ ઇષ્ટ કે સાથ જ્ઞાનયુક્ત હો ધ્યાનરત રહેં
ઔર ઇષ્ટદેવ કે મન્ત્રાક્ષરો કો માતૃકાવર્ણ દ્વારા ક્રમશઃ પુટિત
કરકે સૌ વાર જપ કરેં ॥ ૨૨-૨૩ ॥

કૃત્વા જીવઃ પ્રસન્નાત્મા જપેદસ્ય શતં પ્રિયે ।
યત્સંખ્યાપરમારેણૌ પાર્થિવે પરિવર્ત્તતે ।
તાવદ્વર્ષસહસ્રાણિ શિવલોકે મહીયતે ॥ ૨૪ ॥

જીવ પ્રસન્તચિત્ત સ્થિતિ મે ઇષ્ટમન્ત્ર ૧૦૦ વાર જપે । ઇસસે પાર્થિવ
પરમાણુઓં કી જિતની સંખ્યા હૈ, ઉતને હજાર વર્ષ પર્યન્ત જીવ
શિવલોક મે નિવાસ કરતા હૈ ।

॥ ઇતિ સરસ્વતીતન્ત્રે દ્વિતીયઃ પટલઃ ॥

॥ સરસ્વતીતન્ત્ર કા દ્વિતીય પટલ સમાપ્ત ॥

---

તૃતીયઃ પટલઃ ।

દેવ્યુવાચ -

કુલ્લુકા કીદૃશી નાથ સેતુર્વા કીદૃશો ભવેત્ ।
કીદૃશો વા મહાસેતુર્નિર્વાણં ત્વય કીદૃશમ્ ॥ ૧॥

અન્યથા કથિતં યન્મે કીદૃશ તદ્વદસ્વ મે ॥ ૨॥

દેવા કહતી હૈં -હે પ્રભો કુલ્લુકા કૈસા હૈ ? સેતુ-મહાસેતુ તથા
નિર્વાણ ક્યા હૈ ? આપને જિતને જપાંગ કહે હૈ, વે કિસ પ્રકાર કે
હૈ ? ॥ ૧-૨॥

ઈશ્વર ઉવાચ -

ગુહ્યાદ્ ગુહ્યતરં દેવિ તવ સ્નેહેન કથ્યતે ।
વિના યેન મહેશાનિ નિષ્ફલઞ્ચ જપાદિકમ્ ॥ ૩॥

ઈશ્વર કહતે હૈં -હે દેવી ! જિસકે બિના જપ પ્રભૃતિ નિષ્ફલ
હો જાતે હૈં, ઉસ ગુહ્યતમ જ્ઞાન કો તુમ્હારે પ્રેમવશ પ્રકાશિત
કરતા હૂમ્ ॥ ૩॥

તારાયા કુલ્લુકા દેવિ મહાનીલસરસ્વતી ।
પઞ્ચાક્ષરી કાલિકાયા કુલ્લુકા પરિકીર્ત્તિતા ॥ ૪॥

હે દેવી ! મહાનીલસરસ્વતી કા બીજ (હ્રીં સ્ત્રી હુઁ) સમસ્ત તારામન્ત્રો
કા કુલ્લુકા હૈ । પંચાક્ષરી મન્ત્ર કો કાલિકા કા કુલ્લુકા કહતે હૈં
॥ ૪॥

કાલીકૂર્ચવધુર્માયા ફટ્કારાન્તા મહેશ્વરિ ।
છિન્નાયાસ્તુ મહેશાનિ કુલ્લુકાષ્ટાક્ષરી ભવેત્ ॥ ૫॥

હે મહેશ્વરી ! કાલી બીજ, કૂર્ચબીજ, વધુબીજ તથા માયાબીજ કે અન્ત
મે “ફટ્” લગાને સે જો પંચાક્ષર મન્ત્ર હોતા હૈ, વહી કાલી દેવી
કા કુલ્તુકા કહા જાતા હ । (ક્રીં હું સ્ત્રીં હ્રીં ફટ્) । હે મહશ્વરી !
અષ્ટાક્ષરી મન્ત્ર છિન્નમસ્તા દેવી કા કુલ્લુકા કહાં ગયા હૈ ॥ ૫॥

બજ્વૈરોચનીયે ચ અન્ત વર્મ પ્રકીર્ત્તયેત્ ।
સમ્પત્પ્રદાયા : પ્રથમ ભૈરવ્યા: કુલ્લુકા ભવેત્ ॥ ૬॥

વજ્વૈરોચનીયે પદ કે અન્ત મે ફટ્ કા ઉચ્ચારણ
કરને સે યહ અષ્ટાક્ષર હો જાતા હૈં (વજ્વૈરોચનીયે ફટ્) ।

ભૈરવી કા પ્રથમ બીજ હી ધનદા કા કુલ્લુકા કહા ગયા હૈં ॥ ૬॥

શ્રીમત્રિપુરસુન્દર્યાઃ કુલ્લુકા દ્વાદશાક્ષરી ।
વાગ્ભવં પ્રથમં બીજં કામબીજમનન્તરમ ॥ ૭॥

લક્ષ્મીબીજં તતઃ પશ્ચાત્ ત્રિપુરે ચેતિ તત્ પરમ્ ।
ભગવતીતિ તત્પશ્ચાત્ અન્તે ઠદ્વયમુદ્ધરેત્ ॥ ૮॥

દ્વાદશાક્ષર મન્ત્ર કો ત્રિપુર સુન્દરી કા કુલ્લુકા કહતે હૈ ।
પ્રથમતઃ વાગ્ભવ તદન્તર કામબીજ, તત્પશ્ચાત્ લક્ષ્મીબીજ,
તદન્તર ત્રિપુરે, તત્પશ્ચાત્ ભગવતિ, તત્પશ્ચાત્ સ્વાહા લગાને સે
દ્વાદશાક્ષરી કુલ્લુકા હોતા હેં જૈસે "ઐં ક્લીં શ્રીં ત્રિપુરે ભગવતિ
ઠઃ ઠઃ" ॥ ૭-૮॥

અથવા કામબીજઞ્ચ કુલ્લુકા પરિકીર્ત્તિતા ।
પ્રાસાદબીજં શમ્ભોશ્ચ મઞ્જુઘોષે ષડક્ષરમ્ ॥ ૯॥

અથવા કેવલ કામબીજ (ક્લીં) હો ત્રિપુરા કા કુલ્લુકા હૈં । પ્રસાદ બલિ
(હૌં) શિવમન્ત્ર કા કુલ્લુકા હૈં । ષડ્ક્ષરમન્ત્ર હીં મંજુઘોષ
મન્ત્ર કા કુલ્લુકા કહા ગયા હૈ -ૐ નમઃ શિવાયઃ ॥ ૯॥

એકાર્ણા ભુવનેશ્વર્યા વિષ્ણોઃ સ્યાદષ્ટવર્ણકમ્ ।
નમો નારાયણાયેતિ પ્રણવાદ્યા ચ કુલ્લુકા ॥ ।૧૦॥

એકાક્ષર મંત્ર (હ્રીં) ભુવનેશ્વરી બીજ કા કુલ્લુકા હૈં । વિષ્ણુ મન્ત્ર
કા કુલ્લુકા હૈં અષ્ટાક્ષર મન્ત્ર અર્થાત્ "નમો નારાયણાય" કે પહલે ૐ
લગાયે । "ૐ નમો નારાયણાય" ॥ ૧૦॥

માતઙ્ગયાઃ પ્રથમં બીજં માયા ધૂમાવતીં પ્રતિ ।
બાલાયાશ્ચ વધૂબીજં લક્ષ્મ્યાશ્ચ નિજબીજકમ્ ॥ ૧૧॥

પ્રથમ બીજ (ૐ) માતઙ્ગી કા કુલ્લુકા હે એવં માયાબીજ (હ્રીં) ધૂમાવતી
કા કુલ્લુકા કહા જાતા હૈં । બાલામન્ત્ર કા કુલ્લુકા હે વધુબીજ (સ્ત્રીં)
તથા લક્ષ્મી મન્ત્ર કા કુલ્લુકા "શ્રીં" હી હૈં ॥ ૧૧॥

સરસ્વત્યા વાગ્ભવઞ્ચ અન્નદાયા અનઙ્ગકમ્ ।
અપરેષાઞ્ચ દેવાનાં મન્ત્રમાત્ર પ્રકીર્ત્તિતા ॥ ૧૨॥

સરસ્વતી મન્ત્ર કા કુલ્લુકા હૈં "ઐં" । અન્નદા દેવી કા કુલ્લુકા હૈ

કામબીજ (ક્લીં) । અન્ય દેવતાઓં કા કુલ્લુકા ઉનકા અપના હી મન્ત્ર હૈ ॥ ૧૨॥

ઇયન્તે કથિતા દેવિ સંક્ષેપાત્ કુલ્લુકા મયા ।
અજ્ઞાત્વા કુલ્લુકામેતાં યો જપેદધમઃ પ્રિયે ॥ ૧૩॥

હે દેવી ! મેને સંક્ષેપ મે યહ કુલ્લુકા કહા હૈ । હે પ્રિયે ! જો અધમ
મનુષ્ય બિના કુલ્લુકા કો જાને મન્ત્ર જપ કરતે હૈ ॥ ૧૩॥

પઞ્ચત્વમાશુ લભતે સિદ્ધિહાનિસ્તુ જાયતે ।
તથા જપાદિકં સર્વં નિષ્ફલં નાત્ર સંશયઃ ।
તસ્માત્ સર્વપ્રયત્નેન પ્રજપેન્મૂર્ધ્નિ કુલ્લુકામ્ ॥ ૧૪॥

વે શીઘ્ર હો મૃત્યુ કો પ્રાપ્ત હોતે હૈ ઔર ઉનકી સિદ્ધિ નષ્ટ હો
જાતી હૈ । ઉનકી જપાદિ સમસ્ત સાધના નિષ્ફલ હોતી હૈં । અતઃ
યત્નપૂર્વક મસ્તક કે ઉપર મુર્દ્ધા મે કુલ્લુકા જપે ॥ ૧૪॥

॥ ઇતિ સરસ્વતોતન્ત્રે તૃતીયઃ પટલઃ ॥

॥ સરસ્વતીતન્ત્ર કા તૃતીય પટલ સમાપ્ત ॥

---

ચતુર્થઃ પટલઃ

ઈશ્વર ઉવાચ -

યથ વક્ષ્યામિ દેવેશિ પ્રાણયોગ શૃણુષ્વ મેમ્ ।
વિના પ્રાણં યથા દેહઃ સર્વકર્મસુ ન ક્ષમઃ ॥ ૨॥

વિના પ્રાણં તથા મન્ત્રઃ પુરશ્ચર્યાશતૈરપિ ।
માયયા પુટિતા મન્ત્રઃ સત્વધા જપતઃ પુનઃ ॥ ૨॥

સપ્રાણો જાયતે દેવિ સર્વત્રાયં વિધિઃ સ્મૃતઃ ।
તથૈવ દીપનીં વક્ષ્યે સર્વમન્ત્રેષુ ભાવિનિ ॥ ૩॥

અન્ધકારગૃહે યદ્વન્ન કિઞ્ચિત્ પ્રતિભાસતે ।
દીપનીવર્જિતા મન્ત્ર સ્તથૈવ પરિકીર્ત્તિતઃ ॥ ૪॥

ઈશ્વર કહતે હૈ - અબ પ્રાણયોગ અર્થાત્ મન્ત્ર કા પ્રાણસમ્બન્ધ
કહતા હૂં। હે દેવેશી ! ઉસે શ્રવણ કરો । જૈસે પ્રાણરહિત દેહ
કાર્ય નહીં કરતા, ઉસી પ્રકાર પ્રાણરહિત મન્ત્ર સૈકડો પુરશ્ચરણો
સે ભી સિદ્ધ નહીં હો સકતા । હે દેવીં “હ્રીં” મન્ત્ર સે સમ્પુટિત

કરો ૭ વાર મન્ત્ર જપ કરને મે વહ સપ્રાણ હો જાતા હૈં । સભી દેવો કે મન્ત્ર કે સાથ યહી કરના ચાહિયે । હે ભાવિની ! સભી મન્ત્રો કા દીપની મન્ત્ર અબ કહૂઁગા । જૈસે દીપક કે વિના અંધેરે ઘર મે કુછ નહીં દીખતા ઉસી પ્રકાર દીપની કે બિના મન્ત્ર કા તત્ત્વ પ્રકાશિત નહીં હો સકતા ॥ ૧-૪॥

વેદાદિપુટિતં મન્ત્રં સપ્તવારં જપેત્ પુનઃ ।
દીપનીય સમાખ્યાતા સર્વત્ર પરમેશ્વરિ ॥ ૫॥

હે મહેશ્વરી ! મન્ત્ર કો પ્રણવ (ૐ) સે સમ્પુટિત કરકે ૭ બાર જપે । યહી મંત્રો કા દીપની કરણ હૈ ॥ ૫॥

જાતસૂતકમાદૌ સ્પાદન્તે ચ મૃતસૂતકમ્ ।
સૂતકદ્વયસંયુક્તા યો મન્ત્રઃ સ ન સિધ્યતિ ॥ ૬॥

મન્ત્ર જપ કે આદિ મે જન્મ કા શૌચ તથા મન્ત્ર જપ કે અન્ત મે મરણ શૌચ લગતા હૈ । અતઃ અશૌચયુક્ત મન્ત્ર સિદ્ધ નહીં હોતે ॥ ૬॥

વેદાદિપુટિતં મન્ત્રં સપ્તબારં જપેન્મુખે ।
જપસ્યાદૌ તથા ચાન્તે સૂતકદ્વય ॥ ૭॥

ઇન અશૌચો કો હટાને કે લિયે ૐ સે પુટિત મન્ત્ર ૭ બાર જપે ॥ ૭॥

અથોચ્યતે જપસ્યાત્ર ક્રમશ્ચ પરમાદભુતઃ ।
યં કૃત્વા સિદ્ધિસઙ્ઘાનાંમધિપો જાયતે નરઃ ॥ ૮॥

અબ જપ કા અત્યન્ત અદ્ભુત ક્રમ કહતા હૂઁ, જિસકે અનુષ્ઠાન સે મનુષ્ય સમસ્ત સિદ્ધિ પ્રાપ્ત કર લેતા હૂમ્ ॥ ૮॥

નતિર્ગુર્વાદીનામાદૌ તતો મન્ત્રશિખાં ભજેત્ ।
તતોઽપિ મન્ત્રચૈતન્યં મન્ત્રાર્થભાવનાં તતઃ ॥ ૯॥

પ્રથમતઃ ગુરુ પ્રભૃતિ કો પ્રણામ કરે તદન્તર મંત્રશિખા જપે । તત્પશ્ચાત્ મન્ત્ર ચૈતન્ય કી ભાવના કરકે ઉસકે ઉપરાન્ત મન્ત્રાર્થ ભાવના કરે ॥ ૯॥

ગુરુ ધ્યાનં શિરઃપદ્મં હૃદીષ્ટધ્યાનમાવહન્ ।
કુલ્લુકાઞ્ચ તતઃ સેતું મહાસેતુમનન્તરમ્ ॥ ૧૦॥

નિર્વાણઞ્ચ તતો દેવિ યોનિમુદ્રાવિમાવનામ્ ।

અઙ્ગન્યાસં પ્રાણાયામ જિહ્વાશોધનમેવ ચ ॥ ૧૧॥

પ્રાણયોગ દીપનીઞ્ચ અશૌચભઙ્ગઃ મેવ ચ ।
ભ્રૂમધ્યે વા નસોરગ્રૈ દૃષ્ટિં સેતુજપં પુનઃ ॥ ૧૨॥

સેતુમશૌચભઙ્ગઞ્ચ પ્રાણાયામમિતિ ક્રમાત્ ।
એતત્તે કથિત દેવિ રહસ્ય જપકર્મણઃ ॥ ૧૩॥

ગોપનીયં પ્રયત્નેન શપથસ્મરણાન્મમ ।
એતત્તન્ત્રં ગૃહે યસ્ય તત્રાંહ સુરવન્દિતે ।
તિષ્ઠામિ નાત્ર સન્દેહો ગોપ્તવ્યમમરેષ્વપિ ॥ ૧૪॥

શિર સ્થિત પદ્મ મે ગુરુ ધ્યાન કરે । હૃદય મે ઇષ્ટદેવ કા ધ્યાન
કરકે કુલ્લુકા જપે । તદન્તર સેતુ જપ, તત્પશ્ચાત્ મહાસેતુ જપ
કરના ચાહિયે ।

હે દેવી ! અબ ક્રમશઃ યહ કરે -

નિર્વાણ જપ
યોનિ મુદ્રા ભાવના
અંગન્યાસ
પ્રાણાયામ
જિહ્વાશોધનન્
પ્રાણયોગ
દીપની કર્મ જપ
અશૌચભઙ્ગ જપ

ભ્રૂમધ્ય મેં યા નાસાગ્ર મે દૃષ્ટિ કરકે સેતુ જપ કરે । પુનઃ જપ
કે અન્ત મેં દહ ક્રમશઃ કરે -

સેતુ જપ
અશોચભઙ્ગ જપ
પ્રાણાયામ

હે દેવી ! તુમસે યહ સબ જપ કર્મકા રહસ્ય કહા । મેરો પ્રતિજ્ઞા કો
યાદ રખકર ઇસે ગુપ્ત રખના । હે સુરો દ્વારા નમસ્કૃતે ! જિસકે
ઘર મે યહ તન્ત્ર હૈ, વહાઁ મૈં રહતા હૂઁ, યહ નિઃસદિગ્ધ
હૈ । યુસે દેવતાઓં સે ભી ગુપ્ત રખના । ૯-૧૪॥

॥ ઇતિ સરસ્વતીતન્ત્રે ચતુર્થઃ પટલઃ ॥

॥ સરસ્વતીતન્ત્ર કા ચતુર્થ પટલ સમાપ્ત ॥

---

પઞ્ચમઃ પટલઃ

ઈશ્વર ઉવાચ -

અથાતઃ સમ્પ્રવક્ષ્યામિ શૃણુષ્વ તં પ્રિયમ્વદે ।
યસ્યાજ્ઞાનેન વિફલં જપહોમાદિકં ભવેત્ ॥ ૧॥

ઈશ્વર કહતે હૈં -હે પ્રિયમ્વદે ! જિસે જાને બિના હોમ પ્રભૃતિ
વિફલ હો જાતે હૈં; ઉસે કહતા હૂઁ । શ્રવણ કરો ॥ ૧॥

કુલ્લુકાં મૂર્ધ્નિ સંજપ્ય હૃદિ સેતું વિચિન્તયેત્ ।
મહાસેતું વિશુદ્ધે તુ કણ્ઠદેશે સમુદ્ધરેત્ ॥ ૨॥

મસ્તક કે ઉર્ધ્વ મેં (મૂર્ધા મે કુલ્લુકા કા જપ, હૃદયમેં
સેતુચિન્તન, મહાનસેતુ કા વિશુદ્ધ ચક્રમે ઉદ્ધાર કરે અર્થાત્
ઉચ્ચારણ કરે ॥ ૨॥

મણિપુરે તુ નિર્વાણં મહાકુણ્ડલિનીમધઃ ।
સ્વાધિષ્ઠાને કામબીજં રાકિનીમૂર્ધ્નિ સંસ્થિતમ્ ॥ ૩॥

મણિપુર ચક્ર મેં મહાકુણ્ડલિની કા નિર્વાણ ચિન્તન અધોદિક્ રૂપ
સે કરે । સ્વાધિષ્ઠાન મેં કામબીજ કા, રાકિની શક્તિ કા મૂર્દ્ધા મેં
ચિન્તન કરે ॥ ૩॥

વિચિન્ત્ય વિધિવદ્દેવિ મૂલાધારાન્તિકાચ્છિવે ।
વિશુદ્ધાસ્તાં સ્મરેદ્દેવિ વિસતન્તુતનીયસીમ્ ॥ ૪॥

હે દેવિ ! હે શિવે ! યહ સબ ચિન્તન કરકે મૂલાધાર સે વિશુદ્ધ
ચક્ર પર્યન્ત પ્રસરિત્ મૃણાલસૂત્ર કે સમાન સૂક્ષ્મતમ કુણ્ડલિની
કા ચિન્તન કરે । તદનન્તર “સર્પાકૃતિ કુણ્ડલિની કે અન્ત મે અવસ્થિત
વેદી સ્થાન મૂલમન્ત્ર સે આવરિત હૈ,” યહ ચિન્તન બારમ્બાર કરે
॥ ૪॥

વેદિસ્થાનં દ્વિજિહ્વાન્તં મૂલમન્ત્રાવૃતં મુહુઃ ।
વિપ્રાણાં પ્રણવઃ સેતુઃ ક્ષત્રિયાણાં તથૈવ ચ ॥ ૫॥

વૈશ્યાનાઞ્ચૈવ ફટ્કારો માયા શૂદ્રસ્ય કથ્યતે ।
અજા હૃદિ દેવેશિ યા વં મન્ત્રં સમુચ્ચરેત્ ॥ ૬॥

બ્રાહ્મણ તથા ક્ષત્રિય કે લિએ પ્રણવ (ઊં) સેતુ હૈ । વૈશ્ય કા સેતુ
વૈ ફટ્ તથા શૂદ્ર કા સેતુ હૈ માયાબીજ “હ્રીં” । જો
હૃદય મેં પૂર્વોક્ત જપ ન કરકે મન્ત્રોચ્ચારણ કરતે હૈ,
ઉન્હે મન્ત્ર જપ કા અધિકાર નહીં હૈં ॥ ૫-૬॥

સર્વેષામેવ મન્ત્રાણામધિકારો ન તસ્ય હિ ।
મહાસેતુશ્ચ દેવેશિ સુન્દર્યા ભુવનેશ્વરી ॥ ૭॥

કાલિકાયાઃ સ્વબીજઞ્ચ તારાયાઃ કૂર્ચબીજકમ્ ।
અન્યાસાન્તુ વધુબીજં મહાસેતુર્વરાનને ॥ ૮॥

હે દેવેશી ! સુન્દરી કા મહાસેતુ હે હ્રીં, કાલીબીજ કા ક્લીં, તારા દેવી
કા હું અન્ય દેવતાઓં કા મહાસેતુ હૈ સ્ત્રીં ॥ ૭-૮॥

આદૌ જપ્ત્વા મહાસેતું જપેન્મન્ત્રમનન્ય ધીઃ ।
ધને ધનેશતુલ્યોઽસૌ વાણ્યા વાગીશ્વરોપમઃ ॥ ૯॥

યુદ્ધે કૃતાન્તસદૃશો નારીણાં મદનોપમઃ ।
જપકાલે ભવેત્તસ્ય સર્વકાલે ન સંશયઃ ॥ ૧૦॥

પહલે મહાસેતુ કા જપ કરકે તબ એકાગ્ર હો મંત્ર જપે । ઇસ પ્રકાર
સે જપ કરને પર જપકર્ત્તા ધન કી દૃષ્ટિ સે કુબેરતુલ્ય, કાવ્ય
પ્રયોગ મે વાગીશ્વર કે તુલ્ય, યુદ્ધ મે યમરાજ કે તુલ્ય તથા રમણી
સમૂહ મે કામદેવ કે તુલ્ય પ્રતીત હોતા હૈ । ઉસકે લિયે સભી કાલ
જપ કે લિયે ઉપયુક્ત હૈ ॥ ૯-૧૦॥

અથ વક્ષ્યામિ નિર્વાણ શ◌ૃણુ સાવહિતાઽનઘે ।
પ્રણવં પૂર્વમુચ્ચાર્ય માતૃકાદ્યં સમુદ્ધરેત્ ॥ ૧૧॥

તતો મૂલં મહેશાનિ તતો વાગ્ભવમુદ્ધરેત ।
માતૃકાન્તં સમસ્તાસ્તુ પુનઃ પ્રણવમુદ્ધરેત્ ॥ ૧૨॥

એવં પુટિતમૂલન્તુ પ્રજપેન્મણિપૂરકે ।
એવં નિર્વાણમીશાનિ યો ન જાનાતિ પામરઃ ॥ ૧૨॥

કલ્પકોટિસહસ્રેણ તસ્ય સિદ્ધિર્ન જાયતે ॥ ૧૪॥

અબ નિર્વાણ કા સ્વરૂપ કહતા હૂઁ, જિસે સાવધાન હોકર સુનો ।
પ્રથમતઃ પ્રણવ કા ઉચ્ચારણ કરે । હે મહેશ્વરી ! ઇસકે પશ્ચાત્
મૂલમન્ત્ર ઔર અન્ત મેં "ઐં" બીજ કા ઉચ્ચારણ કરે । ઇસકે
પશ્ચાત્ અં સે લેકર લં ક્ષં પર્યન્ત સમસ્ત માતૃકાઓ કા ઉચ્ચારણ
કરકે પુનઃ ઊં અન્ત મે લગાયે । ઇસ પ્રકાર કે પુટિત મંત્ર કા જપ
મણિપૂર ચક્ર મે કરે । હે ઈશ્વરી ! જો પામર ઇસ નિર્વાણ પ્રક્રિયા
સે અવગત નહી હૈ, વહ કરોડો કલ્પ મે ભી મંત્રસિદ્ધિ પ્રાપ્ત નહીં
કર સકતા ॥ ૧૧-૧૯ ॥

॥ ઇતિ સરસ્વતીતન્ત્રે પંચમઃ પટલઃ ॥

॥ સરસ્વતીતન્ત્ર કા પાચવાં પટલ સમાપ્ત ॥

---

ષષ્ઠઃ પટલઃ

ઈશ્વર ઉવાચ -

અપરૈકં પ્રવક્ષ્યામિ મુખશોધનમુત્તમ્ ।
યન્નકૃત્વા મહાદેવિ જપપૂજા વૃથા ભવેત્ ॥ ૧ ॥

અશુદ્ધજિહ્વા દેવિ યો જપેત્ સ તુ પાપકૃત્ ।
તસ્માત્ સર્વપ્રયત્નેન જિહ્વાશોધનમાચરેત્ ॥ ૨ ॥

ઈશ્વર કહતે હૈ -હે મહાદેવી ! જિસે ન કરને સે જપયજ્ઞ વિફલ
હો જાતા હૌ ઉસ મુખશોધન નામક ઉત્તમ જપાઙ્ગ કો કહતા હૈ ।

હે દેવી ! જો અશુદ્ધ જિહ્વા સે જપ કરતા હૈ, ઉસે પાપી કહતે હૈં ।
અતઃ સભી પ્રયત્ન દ્વારા જિહ્વા શોધન કરના ચાહિયે ॥ ૧-૨ ॥

દેવ્યુવાચ -

દેવદેવ મહાદેવ શૂલપાણે પિનાકધૃક્ ।
પૃથક્ પૃથક્ મહાદેવ કથયસ્વ દયાનિધે ॥ ૩ ॥

શોધનં સર્વાવિદ્યાનાં મુખસ્ય વદ મેં પ્રભો ॥ ૪ ॥

દેવી કહતી હૈ -હે દેવદેવ ! મહાદેવ ! શૂલપાણે, પિનાકી !
હે દયાનિધે ! હે પ્રભો ! આપ પૃથક્-પૃથક્ રૂપ સે સભી વિદ્યાઓં
કા મુખશોધન કહને કી કૃપા કરે ॥ ૩-૪ ॥

મહાદેવ ઉવાચ -

મહાત્રિપુરસુન્દર્યા મુખસ્ય શોધનં શુભે ।
શ્રી બીજં પ્રણવો લક્ષ્મીસ્તારઃ શ્રી પ્રણવસ્તથા ॥ ૫॥

ઇમં ષડક્ષંર મન્ત્રં સુન્દર્યા દશધા જપેત્ ।
શ‍ૃણુ સુન્દરિ શ્યામાયા મુખશોધનમુત્તમમ્ ॥ ૬॥

મહાદેવ કહતે હૈં -હે શોભને ! મહાત્રિપુરસુન્દરી કા
મુખશોધન કહતા હું । શ્રી બીજ, પ્રણવ, કાર, પુનઃ શ્રીબીજ એવં
પ્રણવ લગાયે (શ્રીં ૐ શ્રીં ૐ શ્રીં ૐ ) । હે સુન્દરી યહ ષડક્ષર
મન્ત્ર હૈ । શ્યામાદેવી કે મન્ત્ર જપાંગ ઉત્તમ મુખશોધન કો સુનો
॥ ૫-૬ ॥

નિજબીજત્રયં દેવિ પ્રણવત્રિતયં પુનઃ ।
કામત્રયં વહ્નિબિન્દુરતિચન્દ્રયુતં પૃથક્ ॥ ૭॥

એષા નવાક્ષરી વિદ્યા મુખશોધનકારિણી ।
તારાયાઃ શ‍ૃણુ ચાર્વાઙ્ગી અપૂર્વમુખશોધનમ્ ॥ ૮॥

જીવનીમધ્યમં લજ્જાં ભુવનેશીં તતઃ પ્રિયે ।
ત્ર્યક્ષરીયં મહાવિદ્યા વિજ્ઞેયામૃતવર્ષિણી ॥ ૯॥

હે દેવી નિજ બીજ (ક્લીં) તીન, પ્રણવત્રય તથા તનિ “ક”
કો પૃથક્ પૃથક્ વહ્નિ (ર), રતિ (ઈ) એવં ચન્દ્ર તથા બિન્દુ કા
યોગ કરાકર તીન “ક્રીં” બીજ (ક્રીં ક્રીં ક્રીં ૐ ૐ ૐ ક્રીં
ક્રીં ક્રીં) ઇસ નવાક્ષરી કો શ્યામાતન્ત્ર મે મુખ-શોધનકારિણી વિદ્યા
કહતે હૈ । હે મનોહર અઙ્ગોવાલી તારાદેવી કે અપૂર્વ મુખશોધન કો
સુનો । હે પ્રિયે ! જીવની બીજ કો (હું) બીચ મેં રરવકર ઉસકે પૂર્વ
લજ્જા બીજ (હ્રીં) તથા પશ્ચાત્ મેં ભુવનેશ્વરી બીજ કો લગાયે (હ્રીં )
“હ્રીં ઊ હ્રીં” ત્ર્યક્ષરી મહાવિદ્યા મુખશોધિની અમૃતવર્ષિણી
કહી જાતી હૈ ॥ ૭-૯॥

દુર્ગાયાઃ શ‍ૃણુ ચાર્વાઙ્ગિ મુખશોધનમુત્તમમ્ ।
દ્વાદશસ્વરમુદ્ધૃત્ય બિન્દુયુક્તાત્રયસ્તથા ॥ ૧૦॥

હે સુન્દર અઙ્ગોવાલી ! દુર્ગાબીજ કે ઉત્તમ મુખ શોધન મન્ત્ર કો સુનો ।
બિન્દુ યુક્ત તીન દ્વાદશ સ્વર (ઐં ઐં ઐં) કો હો દુર્ગા કા મુખશોધન

મન્ત્ર કહતે હૈં ॥ ૧૦॥ (પોસ્સિબ્લ્ય્ ઐં હ્રીં દું)

અપરૈકં પ્રવક્ષ્યામિ બગલામુખશોધનમ્ ।
વાગ્ભવં ભુવનેશીઞ્ચ વાગ્બીજં સુરવન્દિતે ॥ ૧૧॥

હે સુરવન્દિતે ! અન્ય એક વિષય કહતા હૂઁ । યહ બગલા મુખશોધન
હૈ । પહલે વાગ્ભવ (ઐં), તદનન્તર ભુવનેશ્વરી બીજ (હ્રીં)
વાગ્બીજ (ઐં) લગાયે । "ઐં હ્રીં ઐં" હી બગલા કા મુખશોધન મન્ત્ર
હૈ ॥ ૧૧॥

માતઙ્ગયા શોધનં દેવિ અંકુશં વાગ્ભવસ્તથા ।
બીજઞ્ચાઙ્કુશમેતદ્ધિ વિજ્ઞેયં ત્ર્યક્ષરીયકમ્ ॥ ૧૨॥

હે દેવી ! અંકુશબીજ, વાગ્ભવબીજ, પુનઃ અંકુશ બીજ કો લગાને સે
ત્ર્યક્ષરી માતઙ્ગી મુખશોધન મન્ત્રં "ક્રોં ઐં ક્રોં" ગઠિત હોતા
હૈ ॥ ૧૨॥

લક્ષ્મ્યાશ્ચ શોધનં દેવિ શ્રીબીજં કમલાનને ।
દુર્ગાયાઃ શોધને માયા વાગ્બીજપુટિતા ભવેત્ ॥ ૧૩॥

દુર્ગે સ્વાહા પુનર્માયા વાગ્બીજઞ્ચ પુનશ્ચ વાક્ ।
પ્રણવં દાન્તમુદ્ધૃત્ય વામકર્ણવિભૂષિતમ્ ॥ ૧૪॥

પુનઃ પ્રણવમુદ્ધૃત્ય ધનદામુખશોધનમ્ ।
એવં મન્ત્રં મહાદેવિ ધૂમાવત્યા ભવેદપિ ॥ ૧૫॥

હે દેવી ! કમલાનને ! લક્ષ્મી મન્ત્ર કા મુખશોધન હૈ
"શ્રીં" । દુર્ગામન્ત્ર કા મુખશોધન હૈ વાગબીજ દ્વારા
પુટિત માયા બીજ, પુનઃ યહી બીજ - "ઐં હ્રીં ઐં દુર્ગે સ્વાહા હ્રીં
ઐં ઐં" । પ્રણવોચ્ચારણ કરકે વામકર્ણયુક્ત (ઉ) દાન્ત (ધ)
કા ઉચ્ચારણ કરકે પુનઃ પ્રણવ લગાયે - "ૐ ધૂં ૐ"
યહ હૈ ધનદા કા મુખશોધન । હે દેવી ! યહી હૈં, ધૂમાવતી કા
ભી મુખશોધન મન્ત્ર ॥ ૧૩-૧૫॥

પ્રણવો બિન્દુમાન્ દેવિ પઞ્ચાન્તકો ગણેશિતુઃ ।
વેદાદિ ગગનં વહ્નિમનુયુગ્ બિન્દુચન્દ્રવત્ ॥ ૧૬॥

દ્વ્યક્ષરં પરમેશાનિ વિષ્ણોશ્ચ મુખશોધને ।
અન્યાસાં પ્રણવો દેવિ બાલાદીનાં પ્રકીર્ત્તિતમ્ ॥ ૧૭॥

હે દેવી ! પ્રણવ તથા બિન્દુ યુક્ત પચાન્તક (ગ) ગણેશમન્ત્ર કા મુખશોધન હૈ, અર્થાત્ “ૐ ગં” । હે પરમેશ્વરી ! વેદાદિ બીજ (ૐ) વહ્નિબીજ (રં) મનુ (ઔ) બિન્દુ તથા ચન્દ્ર કો યુક્ત કરતે હુયે “હ”કાર = “ૐ હ્રૌં” હી વિષ્ણુમન્ત્ર કા મુખ-શોધન મંત્ર હૈં, અન્ય કા પ્રણવ (ૐ) હૈ ॥ ૧૬-૧૭॥

સ્ત્રીણાઞ્ચ શદ્રતુલ્યં હિ મુખશોધનમીરિતમ્ ।
મુખશોધનમાત્રેણ જિહ્વામૃતમયી ભવેત્ ॥ ૧૮॥

સ્ત્રી કે લિયે શૂદ્ર કે હી સમાન મુખશોધન વિહિત હે અર્થાત્ પ્રણવ કે સ્થાન પર દીર્ઘ પ્રણવ ૐ તથા સ્વાહા કે સ્થાન પર “નમઃ” કા પ્રયોગ કરે । મુખશોધન ક્રિયા દ્વારા જિહ્વા તત્કાલ અમૃતમયી હો જાતી હૈ ॥ ૧૮॥

અન્યથા મૂત્રવિડ્યુક્તા જિહ્વા ભવતિ સર્વદા ।
ભક્ષણૈર્દૂષિતા જિહ્વા મિથ્યાવાક્યેત દૂષિતા ॥ ૧૯॥

કલહેર્દૂષિતા જિહ્વા તત્ કથં પ્રજપેન્મનૂમ ।
તત્શોધનમનાચર્ય ન જપેત્ પામરઃ ક્વચિત્ ॥ ૨૦॥

મુખશોધન કે વિના જીભ વિષ્ઠામૂત્ર કે સમાન અપવિત્ર રહતી હૈ, ક્યોકિ અભક્ષ્ય ખાને સે, ઝૂઠ બોલને સે તથા કલહ સે દૂષિત હો જાતી હૈ । અતઃ ઉસ અપવિત્ર (૧૯) જિહ્વા સે મંત્રજપ કૈસે હોગા? પાપયુક્ત માનવ કભી ભી જિહ્વા શોધન કિયે બિના જપ ન કરે ॥ ૧૯-૨૦॥

શૈવશાક્તવૈષ્ણવાદેઃ સર્વસ્યાંવશ્યમેવ ચ ।
અન્યથા પ્રજપેન્મન્ત્રં મોહેન યદિ ભાવિનિ ॥ ૨૧॥

શૈવશાક્ત વૈષ્ણવ સમી ઇસે જાનેમ્ । હે ભાવિની ! યદિ માનવ મોહવશાત્ ઇસકે વિના મન્ત્રજપ કરતા હૈ, તબ ॥ ૨૧॥

સર્વઃ તસ્ય વૃથા દેવિ મન્ત્રસિદ્ધિર્ન જાયતે ।
અન્તે નરકવાસી ચ ભવેત્ સોઽપિ ન ચાન્યથા ॥ ૨૨॥

દેવો યદિ જપેન્મન્ત્રં ન કૃત્વા મુખશોધનમ્ ।
પતનં તસ્ય દેવેશિ કિં પુનર્મર્ત્યવાસિનામ્ ॥ ૨૩॥

ઉસકે સમસ્ત અનુષ્ઠાન વ્યર્થ હોતે હૈં ઔર સિદ્ધિ નહીં મિલતી ।

ઉસે અન્ત મે નરક જાના પડતા હૈ । યહ અન્યથા કથન નહીં હૈ ।

હે દેવેશી ! દેવતા ભી મુખશોધન બિના મન્ત્ર જપને પર પતન કે
ભાગી હોતે હૈં । મૃત્યુ લોકવાસી કી બાત હિ ક્યા ?

॥ ઇતિ સરસ્વતીતન્ત્રે ષષ્ઠઃ પટલઃ ॥

॥ સરસ્વતીતન્ત્ર કા છઠવાઁ પટલ સમાપ્ત ॥

॥ સમાપ્ત ॥

Encoded and proofread by DPD

*sarasvatItantram*

pdf was typeset on April 13, 2024

Please send corrections to *sanskrit@cheerful.com*